वेदान्तसूत्रविमर्शः

डा. अजिकुमार् पि.वि.

Assistant Professor, Dept. of Vedanta,

Government Sanskrit College, Tripunithura

"स्यात्तत्र किमपि वैशिष्ट्यं येन राष्ट्रविशेषः इतरेभ्यः पृथक्त्वं भजते। सांस्कृति-कान्तर्धारा काचित् स्यात् सा विशेषता। स्वीयं तद्वैशिष्ट्यम् इतरमानवावासव्यवस्थाभ्यः राष्ट्रमिमं विशेषयितुं तथा मानवेतिहासे तदीयस्थाननिर्धारणे अपि निर्णायमापदण्डश्च भवेत्।" डा. टि. भास्करेण संशोधितस्य श्रीनारायणगुरुदेवसम्पूर्णकृतयः (मलयालभाषायां) इति ग्रन्थस्य प्राक्कथने विश्रुतलेखकः डा. सुकुमार् अळिक्कोट् महाभागः, मौस्सण् और्सल् इति फ्रांस् देशीयचिन्तकस्य वाणीः एवमुद्धरति। अनुवर्त्यते चात्र अळिक्कोट् महाभागेन "भारतं सन्न्यासिनां देशः"[१] इति। भवेदत्र बहूनां विप्रतिपत्तिः, तथापि राष्ट्रस्यास्य प्रत्येकनागरिकस्यापि अन्तःस्थितां नैसर्गिकीमाध्यात्मिकभावनां प्रति पिहितनेत्रतामनुवर्तयितुं न शक्यते। राष्ट्रमिमं नवीकर्तुं विहितयत्नाः तथा तत्र प्राप्तविजयाश्च सर्वेऽपि तथ्यमिदं ज्ञात्वा तदनुसारं यतमानाः आसन्। विवेकानन्दस्वामिनः महात्मागान्धिनः श्रीनारायणगुरुदेवश्च तेषु अग्रतो गणनीयाः एव।

एकोनविंशतितमशतकस्य सांस्कृतिकेभ्यः अमानविकेभ्यः च वैकृतेभ्यः केरलदेशस्य मोचकेषु प्रातःस्मरणीयः भवति श्रीनारायणगुरुदेवः। तदीयश्रेष्ठतासु मुख्यः भवति यत्सः कश्चन सन्न्यासी आसीदिति। स्वसमुदायनवीकरणाय उपायमन्विषन्तं डा. पल्पुमहाभागं, कोऽपि सन्न्यासी समाजस्य उच्चश्रेण्याम् आरूढः स्यादिति उपादिशत् स्वामिविवेकानन्दः। कश्चन परिव्राजकः समाजौन्नत्ये स्यात् यदा, तदा सामजिक्यः परिच्छिन्नताः स्वयमुन्मूलिताः स्युः। पल्पुमहाभागस्य अन्वेषणमवसितं तदा केरलदेशस्य मार्गदर्शकः सन्दृष्टः। स आसीत् युगप्रभावकारी श्रीनारायणगुरुदेवः। सामाजिक परि च्छे दानाम् अन्तस्तिष्ठन्नेव सः

तदीयपरिच्छिन्नलक्ष्येभ्यः परं मानविकमेकममोघं वीक्षणं प्रसारयत् यत्तत्र तदीयाध्यात्मिकतायाः आधारेणैव। तदवगन्तुं तदीयकृतीनामध्ययनम् आवशयकम्। अद्वैतवेदान्तशास्त्रमेव गुरुदेवकृतग्रन्थानामाधारभूतम्। गुरुणोद्घोषितमेकत्वम् - समुदायधर्मदैवानामेकत्वम् - अद्वैतेन एव साध्यते।

मलयालभाषया संस्कृतभाषया च गुरुदेवेन स्वीयमतानि प्रकाशितानि। बहवस्तत्र ग्रन्थाः कैरल्यां विरचिताः, यतः सः सामान्यजनान् उद्दिश्य औपनिषदं मतं प्रकाशितं तैः ग्रन्थैः। तदीयग्रन्थेषु प्रायेण लघुकायः तथा सूत्रात्मकश्च कश्चन वर्तते - वेदान्तसूत्राभिधः[२]। ग्रन्थागतसूत्राणामेकमध्ययनमत्र चिकीर्षितम्। तानि सूत्राणि अधः दीयन्ते यथा डा. भास्करन् महोदयेन प्रकाशितग्रन्थे उल्लिखितानि।

१. अथ यदात्मनो जिज्ञासुः।

२. तदिदं ब्रह्मैवाहम्।

३. किं तस्य लक्षणम्।

४. अस्य च कति गणनयेति।

५. तज्ज्योतिः।

६. तेनेदं प्रज्ज्वलितम्।

७. तदिदं सदसदिति।

८ भूयोऽसतस्सदिति।

९. सच्छब्दादयो असदभावश्चेति।

१०. पूर्वं सदिदमनुसृत्य चक्षुरादयश्चैकं चेति।

११. ज्ञातृज्ञानयोरन्योन्यविषयविषयित्वन्मिथुनत्वमिति।

१२. एवं ज्ञानज्ञेयविभागे।

१३. एकैकं रुद्रत्वमासीदिति।

१४. ब्रह्मैवाहम्।

१५. तदिदम्।

१६. ब्रह्मैवाहमस्मि।

१७. अतीतागामिनोरसत्त्वम्।

१८. यतो यदेतन्विच्छत परिमाणम्। यतः सञ्चितागामिनोः असत्त्वात् एतत् परिच्छिन्नम् -परिमितम् अन्विच्छत।

१९. ततः सदसतोरन्योन्यकारणत्वात् अहं ममेति विज्ञातः मत्तो नान्यः।

२०. तद्वत् तस्मात् दृग्दृश्ययोः समानकालीनत्वात् सुखैकत्वात् व्यापकतया दिशामस्तित्वात् अणुमहदवयवतारतम्यस्य अभावात्, असतो अव्यापकत्वात् आत्मान्यत् कश्चिन्नास्ति।

२१. तस्मात् तस्य सत्त्वाच्च।

एतेषां सूत्राणामुपलब्धिविषये संशोधकः डो. टि. भास्करः एवमभिप्रैति - "गोविन्दनाशान् इत्यभिधात् प्राप्तेऽस्मिन् संस्कृतग्रन्थे अद्वैतवेदान्तः संक्षिप्ततया असन्दिग्धश्च प्रतिपादितः। पूर्वपक्षखण्डनं, तथा संज्ञादिसङ्केतान् च विना वेदान्तशास्त्रसारः अत्र अन्तर्गतः " इति। एतेषां सूत्राणां सङ्ख्यापदच्छेदादिविषये संशोधकमतादिभिन्नं वर्तते मदीयं मतं यदत्र लेखान्ते प्रदर्श्यते।

अथ इदानीं प्रत्येकमपि सूत्रं यथाशास्त्रं यथामति विचिन्त्यते -

अथ यदात्मनो जिज्ञासुः

वेदान्तसूत्रग्रन्थस्य प्रथममिदं सूत्रं अथ आत्मनो जिज्ञासुः इति। संसारानलसन्तप्तः मुमुक्षुः, प्रदीप्तशिराः जलराशिमिव, श्रोत्रियं ब्रह्मनिष्ठं च गुरुमुपगच्छति इति वेदान्तशास्त्रमर्यादा। आख्यायिकारूपेण प्रायेण सर्वास्वपि उपनिषत्सु शिष्यस्य गुरूपसत्तिः प्रदर्शिता च। यथा छान्दोग्योपनिषदि जाबालसत्यकामस्य, उपकोसलस्य, श्वेतकेतोः, नारदस्य तथा इन्द्रस्य च गुरूपगमनानि वर्णितानि। आख्यायिकाः विद्यास्तुत्यर्थाः इति भाष्यकारेण शङ्कराचार्येण तत्र तत्र प्रदर्शितञ्च। तथापि विद्याप्राप्तौ गुरूपगमनमनिवार्यमिति सर्वत्र अभिमतम्। तथा च उपकोसलविद्यायाम् उपकोसलाय विद्याम् उपदिश्य अग्नयः - "आचार्यस्ते गतिं वक्ता" इति वदति। छान्दोग्ये एव आचार्यवान् पुरुषो वेद इति प्रस्तावः। एवमेव कठोपनिषदि, तैत्तिरीयोपनिषदि, बृहदरण्यकोपनिषदि, प्रश्नोपनिषदि तथा अन्यत्रापि उपनिषत्सु गुरूपसदनं प्रदर्शितम्। स्वयमुपनिषच्छब्दोऽपि शिष्यस्य गुरूपमनद्योतकम्। उपेत्युपसर्गस्य समीपेत्यर्थः।

शास्त्रसम्मतं शिष्यस्य गुरूपगमनमेव प्रथमेन सूत्रेण सूच्यते। शिष्यश्च गुरुमुपगम्य सोपचारं संसारनिवृत्तयुपायं पृच्छति। कश्च शिष्यः योग्यः शास्त्रस्यास्य अध्ययने इति ग्रन्थान्तरेभ्यो अवगन्तव्यः। तथा च शारीरकमीमांसायाम् उक्तम्- साधनचतुष्टयसम्पन्नः इति। तत्र अथशब्दस्य योऽर्थः निर्धारितः स एव अत्र अनुवर्तनीयः। तथा च नित्यानित्यवस्तुविवेकः इहामुत्रार्थफलभोगविरागः, शमादिषट्कसम्पत्तिः, मुमुक्षुत्वञ्च। एतेषु सत्सु धर्मजिज्ञासायाः प्रागपि ब्रह्म जिज्ञासितुं ज्ञातुं च शक्यते इति सिद्धान्तः। स एव सिद्धान्तः अत्र सूत्रे अथेति शब्देन सूचितः। अथ साधनचतुष्टयसम्पत्त्यनन्तरं स्वस्वरूपजिज्ञासया शिष्यः गुरुमुपगच्छति। गुरुश्च कीदृशः इति उपनिषदनुसारेण वेदान्तसारे उक्तम् - श्रोत्रियं ब्रह्मनिष्ठम् इति।

एवमुपगम्य शिष्यः आत्मस्वरूपं पृच्छति। तदा गुरुः अध्यारोपवादन्यायेनइ शिष्यजिज्ञासामुपशमयति। तथा चात्र सूत्रम्- **तदिदं ब्रह्मैवाहम्** इति। शिष्येण यज्जिज्ञासितं तदेवेदम्। अत्र तदेतदोः ऐक्यमपि सूचयति। न तावता, किन्तु अहमपि ब्रह्मेति। यत् जिज्ञासितं - तदेव इदमिति तच्छब्दवस्तुसूचितविप्रकृष्टवदवभासमानम् एव इदंशब्दवाच्यसन्निकृष्टवस्तु। प्रत्यक्षादिप्रमाणैरवगम्यमानं जगत् तथा अस्मद्विप्रकृष्टवदभासमानं जगत्कारणमिति प्रोक्तं यत् तत्, तदेवदम्। जगत्कारणस्य तथा कार्यस्य जगतश्च ऐक्यमत्र सूच्यते। ततः परमत्र उच्यते- ब्रह्मैवाहमिति। किं तत् यत् इदमेन ऐक्यङ्गतमिति जिज्ञासाशमनात्प्रागेव उक्तम् - न केवलं कार्यकारणयोरेवैक्यं किन्तु अहमिति शब्देन विवक्षितजीवस्य परमकारणत्वेन शास्त्रसम्मतस्य तच्छब्दनिर्दिष्टब्रह्मणश्च अभेदः। जगद्ब्रह्मणोरभेदं बुद्ध्वा ज्ञतुरुपासकस्य ज्ञेयब्रह्मणा अभेदोऽप्यत्र उक्तः।

एवं जीवजगतोः ब्रह्मणा अभेदे उक्ते ब्रह्मस्वरूपविषये भवति ज्ञिज्ञासा, सैवागामिसूत्राभ्यामुच्यते - **किं तस्य लक्षणम्**। ततः परेण सूत्रेण तद्गतभेदांश्च पृच्छति - **तस्य च कति गणनयेति**। अत्र सूत्रविभागः किमर्थमिति आशङ्का। वस्तुतः अत्र सूत्रविभागः नापेक्षते इति मे मतिः। यत्रैव स्वरूपजिज्ञासा तत्रैव तद्गतभेदाश्च जिज्ञासिताः इति विचारे एकमेव सूत्रमत्रेति गणनीयम्। सर्वत्रापि शास्त्रेषु इयमस्ति परम्परा यदुद्देश्यप्रकरणे पदार्थस्वरूपं तद्भेदांश्च यथा तर्कसङ्ग्रहादिषु पदार्थान् प्रदर्श्य तद्भेदांश्च प्रदर्शयति। एवमत्रापि शास्त्रे यदुक्तं प्रमेयं ब्रह्म किं तस्य भेदाः सन्तीति जिज्ञासया शिष्यस्यायं प्रश्नः। अनेन ब्रह्मणो भेदाः सन्तीति ग्रन्थकाराभिमतमिति न चिन्त्यम्। किन्तु भेदमाशङ्क्य निराकरणमत्र क्रियते। ब्रह्मणो सजातीयविजातीयस्वगतभेदाः न सन्तीति प्रदर्श्य तदखण्डतासमर्थनमत्र चिकीर्ष्यते।

जिज्ञासितप्रश्नाः अत्र समाधीयन्ते -तज्ज्योतिः इति। तदिति जिज्ञासितं ब्रह्म उक्तम्। तच्च ब्रह्म प्रकाशस्वरूपम्। ज्योतिश्शब्दः ब्रह्मवाचकः इति शारीरकमीमसायां निर्धारितम् ज्योतिश्चरणाधिकरणे। "तद्देवा ज्योतिषां ज्योतिः आयुर्होपासते अमृतम्" इति श्रुतिः। स्वयं प्रकाशमानं परप्रकाशनिरपेक्षतया ब्रह्मेति शास्त्रमतम्। स्वयं ज्योतिरिति ब्रह्मणः स्वरूपमत्र प्रदर्शितम्।

स्वयं प्रकाशमानं ब्रह्म जगदवभासयति सर्वमिति बोधयति - **तेनेदं प्रज्वलितम्** इति सूत्रेण। जगदवभासयति इति सूत्रस्यास्य तात्पर्यम्। तथा च श्रुतिः तस्य भासा सर्वमिदं विभाति इति ब्रह्मणो जगदवभासकतां प्रदर्शयति।

ज्योतिः ब्रह्म तज्ज्वलितजगच्च कथं विदिते इति ज्ञापयति अग्रिमं सूत्रम्। ब्रह्मविवर्तस्य जगतः अनिवर्चनीयता ब्रह्मणश्च पारमार्थिकता चानेन सूत्रेण ज्ञाप्येते। तच्च सूत्रं यथा **तदिदं सदसदिति**। अत्र तत् सत् इति इदम् असदिति सूत्रविभागः कार्यः। पारमार्थिकदशायां तच्छब्देनाभिधीयमानं ब्रह्म सत् तथा इदमितिशब्देन उच्यमानं जगत् असदिति अर्थः। सदिति शब्दस्य त्रिकालाबाध्यम् इति अर्थः। असच्छब्दस्य -क्वचिदपि उपाधौ सत्त्वेन प्रतीयमान त्वानधिकरणत्वमिति अद्वैतसिद्धौ शास्त्रसम्मतोऽर्थः - यद्यपि अस्ति तथापि सोऽर्थः नात्र स्वीकर्तव्यः। असदिति शब्दः अव्याकृतमित्यर्थे उपनिषदि प्रयुक्तः - यथा असदेवेदमग्रे आसीदिति।१ सोऽर्थः अत्र उचितः। स्वयं ग्रन्थकारेण दर्शनमालेति ग्रन्थान्तरेऽपि अयं शब्दः एतस्मिन्नेवार्थे प्रयुक्तः। तथा च दर्शनमालायाः प्रथमोऽयं श्लोकः - आसीदग्र असदेवेति२। नात्र असच्छब्दस्य त्रिकालाबध्यत्वाभावरूपोऽर्थः अथवा अलीकमित्यर्थो वा नोचितः। अतः एवात्र अव्याकृतमिति अर्थः स्वीक्रियते। अपि च शारीरके विलक्षणत्वाधिकरणे असदिति चेन्न प्रतिषेधमात्रत्वात् इति सूत्रभाष्ये असच्छब्दस्य अर्थः भाष्यकारेण एवं निरूपितः - प्रतिषेधमात्रं हीदं नास्य प्रतिषेधस्य प्रतिषेध्यमस्ति[3]। .... यथैव हीदानीमपीदं कार्यं कारणात्मना सदेवं प्रागुत्पत्तेः अपि इति गम्यते। नहीदानीमपि इदं कार्यं कारणात्मानमन्तरेण स्वतन्त्रमेवास्ति। इति। एवं भाष्यकारसम्मतं अव्याकृतमित्यर्थः अत्र स्वीकृतः इति गम्यते।अतो ज्ञायते यत् तदिदं सदसदिति सूत्रेण ग्रन्थकारः ब्रह्मणः सत्त्वम्, जगतश्च असत्त्वम् - अव्याकृतत्वम् इति स्वरूपनिर्धारणं कृतमिति।

उक्तमेव पुनः स्पष्टयति अनन्तरसूत्रेण भूयोऽसतस्सदसदिति। असदेवम् अग्र आसीदिति छान्दोग्योपनिषद्गतं वाक्यमत्र अनुवर्तते। असतः सदसदिति उभयमजायत

इत्यर्थः। असतः - अव्याकृतात् सत् - त्रिगुणात्मकात् सत् सदिति प्रतीतियोग्यम् अपञ्चीकृतभूतपञ्चकमत्र सच्छब्दवाच्यम्। सन्मात्रस्वरूपं ब्रह्म नात्र असतः जातमिति उक्तम्। अत्र सच्छब्दशब्दस्य सदिति प्रतीतियोग्यमित्यर्थः किमर्थं दत्तः इति आशङ्कायाम् उच्यते- पूर्वसूत्रे तदिदं सदसत् इत्यत्र सद्धर्मरहितं निर्धर्मकं ब्रह्म सच्छब्दवाच्यमुक्तम्। तत्र च निर्धर्मकं ब्रह्म सदितिप्रतीतियोग्यमिति सदितिशब्देन व्यवहृतम्। वक्ष्यमाणसूत्रे सच्छब्दस्य सदितिप्रतीतियोग्यम् अपञ्चीकृतभूतपञ्चकमित्यर्थो देयो भवति यतस्तस्य तत एव इन्दियोत्पत्तिः। एवमत्रार्थो भवति यत् अव्याकृतप्रपञ्चात् सदितिप्रतीतियोग्यम् अव्यक्तावस्थापन्नं तन्मात्रावस्थितं भूतपञ्चकमभवत्। तच्च सत् न व्यक्ततां गतं, न पञ्चीकृतमिति असदिति पुनरुक्तम्। एवं सच्च तदसच्च सदसदिति कर्मधारयोऽत्र समासः।

निर्धमकब्रह्म कथं सदिति उच्यते इति स्यादाशङ्का। तत्रेदं समाधानम् - **सच्छब्दादयोऽसदभवच्च**। इति। सत्त्वं चित्त्वम् आनन्दतेत्यादिधर्माः ब्रह्मणि प्रोच्यन्ते ते न वास्तविकाः, किन्तु असदादीनामभावः। तथा च असत्त्वाभावः सत्त्वम्, जडाभावः चित्त्वम्, आनन्दत्वञ्च दुःखाभावः। विषयोऽयं प्रासङ्गिकतया उक्तः।

प्रासङ्गिकमुक्त्वा प्रकृतमनुवर्तते - **पूर्वं सदिदमनुसृत्य चक्षुरादयश्चैकम् चेति**। सदितिप्रतीतियोग्यं भूतपञ्चकमनुसृत्य ततः चक्षुरादीनीन्द्रियाणि, एकमन्तःकरणञ्च चोत्पद्यन्ते। उपाधिभेदेन अन्तःकरणस्य एकस्यापि मनोबुद्ध्यहङ्कारचित्तभेदेन चातुर्विध्यम्। निरुपाधिकमाश्रित्य अत्रैकमिति उक्तम्। अन्तःकरणावच्छिन्नं चैतन्यं ज्ञाता, ज्ञातृनिष्ठप्रमाविषयः ज्ञेयः। अन्तःकरणावच्छिन्नचैतन्यस्य चक्षुरादिद्वारा विषयदेशं प्रवृत्तस्य विषयकारेण परिणममनस्य ज्ञानशब्देन व्यवहारः। एवं ज्ञातृज्ञानज्ञेययोः विभागः।

ज्ञात्रादिविभागमुक्त्वा ज्ञातृज्ञानयोर्मिथुनत्वमुच्यते - **ज्ञातृज्ञानयोरन्योन्यविषयत्वान्मिथुनत्वमिति**। विषयविषयिणोः इतरेतरभावापत्तिरितिर शारीरकभाष्यमत्र स्मर्तव्यम्। तत्र ज्ञातृज्ञेययो र्मिथुनत्वमुक्तमपि अत्र ज्ञानमपि विषयश्रेण्यामन्तर्भवतीति तस्यापि विषयता अत्र उच्यते।

ज्ञातृज्ञेयस्वरूपे सूचिते तयोः विभागोऽपि प्रदर्शितः इति अग्रिमेण सूत्रेण उच्यते- **एवं ज्ञातृज्ञेयविभागे इति**। ज्ञाता विषयी, ज्ञानञ्च प्रमणम्। विषयदेशं गच्छतोऽन्तःकरणस्य विषयाकारेण परिणामे अन्तःकरणवृत्तिरिति संज्ञा। सैव वृत्तिः ज्ञानमथवा प्रमाणमिति उच्यते। वत्तिप्रत्यक्षाय वृत्तयन्तरास्वीकारात् वृत्तेः स्वविषयत्वम्। उक्तञ्च वेदान्तपरिभाषायाम् - वृत्तेः

वृत्त्यन्तराविषयत्वेऽपि स्वविषयत्वाभ्युपगमादिति। एवञ्च ज्ञानस्य विषयता विषयिता च। स्वयं ज्ञातापि नात्यन्तमविषयः - अस्मत्प्रत्यविषयत्वात्। उक्तञ्च शारीरके नायमत्यन्ताविषयः, अस्मत्प्रत्ययविषयत्वत् इति। एवं ज्ञातृविषययोः (ज्ञानस्यापि विषयत्वात् विषयेऽन्तर्भावः) अन्योन्यविषयविषयिता। तथा मिथुनत्वमेकत्वञ्च।

ज्ञातृज्ञानज्ञेयेतिभेदः व्यावहारिक एव, न पारमार्थिकः इति प्रदर्शयति - **एकैकं रुद्रत्वमासीदिति**। रुद्राः यद्यपि एकादशस्ङ्ख्याकाः। सन्ति, तथापि एक एव रुद्रो न द्वितीयोऽवतस्थे इति श्रुत्या तस्य अद्वितीयत्वम् प्रकाशितम्।

उक्तमेवैकत्वं ब्रह्मणि अपि इति समन्वयः क्रियते - **ब्रह्मैवाहम्** इति सूत्रेण। ब्रह्मलक्षणं, ततो जगत्सृष्टिं चोक्त्वा तद्ब्रह्मणा ज्ञातुरेकत्वमत्र प्रदर्श्यते।

न केवलं ज्ञातुः ब्रह्मणा अभेदः अपि तु इदंशब्दाभिधस्य जगतोऽपि इति प्रदर्शयति **तदिदम्** इति सूत्रेण। यज्जिज्ञासितं लक्षितं च तदेव ब्रह्म अहं- जीवः अस्मि। तदेव ब्रह्म- इदं जगदपि अस्ति। जीवात्मना जगदात्मना च चानुभूयमानं वस्तु ब्रह्मैव, तदेव चाहमस्मि इति साधकानुभवकथनेन किं तद्ब्रह्म, तस्य च कति गणनया इति उपक्रान्तस्य उपसंहारः। **ब्रह्मैवाहम्** तदिदंम् इत्यनयोः अपि सूत्रयोः विभागो नापेक्षितः। यतोऽत्र ब्रह्मैवाहम् तदिदमिति जीवजगतोः ब्रह्मणा अभेदः लक्षितः।

ब्रह्मैवाहमस्मि इति भवति अग्रिमं सूत्रम्। अहं ब्रह्मास्मि इति अनुभववाक्यप्रतिपादितोऽभेदो अत्र वर्ण्यते। एवं न स्वीक्रियते तर्हि ब्रह्मैवाहमिति सूत्रस्याभ्यासः स्यादिदं सूत्रम्। अर्थात् आचार्योपदेशेन अवगतब्रह्मस्वरूपस्य प्रारब्धेतरत् द्विविधमपि कर्म - सञ्चितम् आगामि च फलानारम्भकत्वात् नष्टं भवति। पुनः तदुपभोक्तुं तस्य जन्म न भवेदिति अर्थः। प्रारब्धं चोपभोगेनैव शम्यति। ज्ञानेन अविद्यानाशात् अहं नित्यमुक्तस्वरूपः सच्चिदानन्दस्वरूपः परमात्मा अस्मि इति अखण्डाकारा काचिदन्तःकरणवृत्तिः उदेति। सा च वृत्तिः, यथा कतकरजः सर्वमपि रजः दूरीकृत्य स्वयमपि नष्टं भवति, तद्वत् सर्वमपि अज्ञानं नाशयन्ती स्वयमपि नश्यति।

तथा च ब्रह्मस्वरूपे साक्षात्कृते, उपासकस्य किं भवति इति प्रदर्श्यते - **अतीतागामिनोरसत्त्वम्** इति। साक्षादनुभूते ब्रह्मास्मि इत्यनुभवे अतीतागामिनोरसत्त्वं भवति। अतीतं - सञ्चितं कर्मफलं तथा आगामि - प्रवर्तमानजन्मनि क्रियमाणकर्मणां फलं

चोपासकाय अकिञ्चित्करे भवतः। तदुपभोगाय पुनः तेन जन्म न स्वीकर्तव्यमिति अर्थः। माण्डूक्योक्तं - "भिद्यते हृदयग्रन्थिः च्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे"।। इति अवस्था अत्र सूच्यते। कर्माणि क्षीयन्ते इत्यस्य सञ्चितागामिनोः क्षयः उक्तः। तर्हि प्रारब्धः पुनः फलजनको वेति शङ्कायाः परिहारः अत्र उच्यते-

यतो यदेतदन्विच्छत परिमाणम्- इति। यतः यत् परिमाणम् एतदन्विच्छत। यतः पूर्वोक्तयोः अतीतागामिनोः - सञ्चितागामिनोः कर्मफलयोः असत्त्वम्- अकिञ्चित्करत्वम्, ततः इति अर्थः। परिमाणम् - परिमीयते परिच्छिद्यते अनेन इति यावत्। प्रारब्धम् इति अर्थः। एतदन्विच्छत - अनुभवत। स्वेच्छया अनिच्छया परेच्छया वा प्राप्तानि प्रारब्धवशगतानि अनुभोक्तव्यानि इति अर्थः।

एवं वक्तव्ये उक्ते ग्रन्थमुपसंहर्तुकामोऽद्वैतं समर्थयन् आह- **ततः सदसतोः अन्योन्यकारणत्वात् अहं ममेति विज्ञातः मत्तो नान्यः** इति। यतः चैतन्येन सता एवेदमव्याकृतं जगदात्मना प्रज्वलितम्, ततः सत् असतः कारणम्। असता (पारमार्थिकदृष्ट्या अहं ममेति अध्यासाश्रयणात्) शास्त्रेण एव सद्ब्रह्म ज्ञायते इति असत्कारणत्वं सत्युपपद्यते। अहं ब्रह्मैवास्मि इत्यनुभवे अहं ममेत्यादिरूपेण व्यवह्रियमाणं सर्वमपि मत्तः - आत्मनः नान्यदिति निश्चिता धीः - अद्वैतनिश्चयः जायते। स एव आत्मनिश्चयः अत्र उद्दिश्यते।

विवक्षितमुक्त्वा ग्रन्थमुपसंहरति - **तद्वत् तस्मात् दृग्दृश्ययोः समकालीनत्वात् सुखैकत्वात् व्यापकतया दिशामस्तित्वात् अणुमहदवयवतारतम्यस्याभावात्, असतो अव्यापकत्वात्, आत्मान्यत् किञ्चिन्नास्ति।** दृगदृश्ययोः समानकालीनत्वात् - उदिते ब्रह्मज्ञाने दृश्यप्रपञ्चस्य तिरोभूतत्वात् दृशः अपि अभावः। दृश्ये नष्टे पुनः क्व दृक्। अथवा सर्वस्यापि प्रपञ्चस्य व्यावहारिकतया पारमार्थिकत्वाभावः। तेन दृश्यस्य दृशश्च व्यावहारिकत्वात् समानकालीनत्वम्। सुखैकरूपत्वात्- आत्मनः सुखैकरूपत्वात्। आत्मा आनन्द-घन इति तस्य सुखैकरूपत्वम्। इतरापेक्षया व्यापकानां दिशाम् आत्मापेक्षया व्याप्यत्वम्। प्रापञ्चिकानाम् अणुमहदितितारतम्ये सत्यपि निरवयवे परमात्मनि तारतम्याभावः। अव्याकृतस्य असतः अव्यापकत्वात्, परमात्मनः व्यापकत्वात् च। उक्तेभ्यः हेतुभ्यः आत्मान्यत् किञ्चिन्नास्ति।आत्मेतरत् किमपि नास्तीति आत्मेतरेषां व्यावहारिकाणाम् पारमार्थिकत्वं निराक्रियते।

आत्मपर्यन्तानां सर्वेषां नेति नेति निरासः श्रुत्या क्रियते। तर्हि किमात्मनोऽप्यभावः येन सर्वशून्यतापत्तिः स्यादिति शङ्कायाम् तन्निरासाय अन्तिमं सूत्रमाह - **तस्मात् तस्य सत्त्वाच्च**। आत्मभिन्नानाम् सर्वेषां पारमार्थिकत्वाभावात् आत्मनश्च सत्त्वात् अपि अद्वैतमेव पारमार्थिकमिति सिद्ध्यति। एवं शिष्यजिज्ञासितं ब्रह्मस्वरूपं तदखण्डता च प्रतिपदिते। सजातीयविजातीयस्वगतरूपभेदत्रयशून्यं भवति ब्रह्मेति शास्त्रार्थः अत्र प्रदर्शितः।

सकलजगदवभासकं चैतन्यमेव आत्मेति तत एव व्याकृताव्याकृतात्मकमिदं जगदभवत् तथा प्रमाणप्रमेयप्रमात्रात्मकत्रिपुटिः वस्तुतः आत्मैवेति स्वयं साधकश्च आत्मैव इत्यपि तस्मिन्नवगते कर्मणामकिञ्चित्करत्वं, दृश्यमिदं जगद् दृक्स्वरूपिणो आत्मनो अभिन्नमिति तस्यैव आत्मनः सत्त्वादेव सकलस्यापि प्रपञ्चस्य सत्त्वमिति तस्य च सत्त्वेन न शून्यतेति सर्वोऽपि वेदान्तसिद्धान्तः अस्मिन् लघुकाये ग्रन्थे सूत्रात्मना प्रतिपादितः। एवं यज्जिज्ञासितं तथा तदिदं ब्रह्मैवाहमिति उपक्रान्तं च यत् तस्यैव ब्रह्मणः सत्त्वं प्रदर्श्य उपसंहृतमिति लभ्यते।

अथ अत्र सूत्रसङ्ख्याविषये किञ्चिद्वक्तव्यः। सूत्राणि एकविंशतिसङ्ख्याकानि संशोधकेन सूचितानि। किन्तु अत्र तृतीयं चतुर्थं च सूत्रे - किं तस्य लक्षणम्, तस्य च कति गणना इति विभागस्यावश्यकता नास्ति। मतमिदं सूत्रव्याख्याप्रसङ्गे उक्तमेव। अतस्तदुभयमेकमिति गणनया सूत्रसङ्ख्या विंशतिरिति ज्ञायते।

एवं श्रीनारायणगुरुदेवकृतानि वेदान्तसूत्राणि यथामति व्याख्यातानि।

* * *